10

GOVERNMENT OF INDIA

SANSKRIT COMMISSION

QUESTIONNAIRE

Rd by post on 24/11/1956
at 5.30 P.M.
B. V. Mahiyamanavalan

SANSKRIT COMMISSION SECRETARIAT
POONA 4
November 18, 1956

भारतीयम् अधिशासनम्

संस्कृतायोगः

प्रश्नावली

संस्कृतायोग - सचिवालयः

पूना ४

कार्त्तिक-पौर्णमासी, संवत् २०१३, शकाब्दाः १८७८

॥ ॐ ॥ विदितं खलु भवतां यत् भारतगतस्य संस्कृताध्ययनस्य साम्प्रतिकीं समवस्थां सर्वतोदिशं परिशीलयितुं १९५६-खिस्ताब्दस्य अक्तोबर-मासे भारतीयेन अधिशासनेन 'संस्कृतायोगः' कश्चन नियुक्तः, यत्र इमे सदस्यत्वेन निर्दिष्टाः —

१. डॉक्टर श्रीमान् सुनीतिकुमारः चट्टोपाध्यायः,
पश्चिम-वङ्ग-विधान-परिषत्-सभापतिः, कलिकाता ॥ अध्यक्षः ॥

२. श्रीमान् जयन्तकृष्णः हरिकृष्णात्मजः दवे,
भारतीय-विद्याभवन-संचालकः, मुम्बई ॥

३. डॉक्टर श्रीमान् सुशीलकुमारः देवः,
कलिकाता-संस्कृतमहाविद्यालये गवेषणा-विभागस्थः संस्कृत-प्राध्यापकः [अधुना यादवपुर-विश्वविद्यालयस्थः प्राध्यापकः], कलिकाता ॥

४. डॉक्टर श्रीमान् ति. रा. वेङ्कटाचलमूर्तिः,
वाराणसी-हिन्दु-विश्वविद्यालयस्थः 'सयाजीराव-गायकवाड'-भारतीय-सभ्यता-संस्कृति-प्राध्यापकः, वाराणसी ॥

५. डॉक्टर श्रीमान् वे. राघवः,
मद्रास-विश्वविद्यालयस्थः संस्कृत-प्राध्यापकः, मद्रास ॥

६. आस्थान-विद्वान् पण्डितराजः वे. सु. रामचन्द्रशास्त्री,
शाङ्करमठः, वेङ्गलूर ॥

७. प्राध्यापकः श्रीमान् विश्वबन्धुशास्त्री,
विश्वेश्वरानन्द-वैदिक-संशोधनमन्दिर-संचालकः, होशियारपुर ॥

८. डॉक्टर श्रीमान् रामचन्द्रः नारायणसूनुः दाण्डेकरः,
पूना-विश्वविद्यालयस्थः संस्कृत-प्राध्यापकः, पूना ॥ सदस्य-सचिवः ॥

एषः आयोगः स्वीयविविधकार्येषु विश्वविद्यालयगतं तदितरसंस्थागतं च संस्कृतशिक्षाविषयकं साम्प्रतिकम् आनुकूल्यं विलोकयिष्यति, उपकल्पयिष्यति च तांस्तान् उपायविशेषान् संस्कृताध्ययनस्य संस्कृतसंशोधनस्य च अभिवृद्धये ।

You are aware that the Government of India have appointed (in October 1956) a Sanskrit Commission to consider the question of the present state of Sanskrit Education in India in all its aspects with the following persons as Members:

1. Dr. Suniti Kumar Chatterji,
   Chairman, West Bengal Legislative Council,
   Calcutta. (Chairman)

2. Sri J. H. Dave,
   Director, Bharatiya Vidya-Bhavan, Bombay.

3. Prof. S. K. De,
   Professor of Sanskrit Language and Literature,
   Post-Graduate Research Department, Sanskrit College,
   Calcutta. (Now Professor, Jadavpur University, Calcutta.)

4. Prof. T. R. V. Murti,
   Sayajirao Gaekwad Professor of Indian Civilization and Culture,
   Banaras Hindu University, Banaras.

5. Prof. V. Raghavan,
   Professor of Sanskrit, University of Madras, Madras.

6. Asthana-Vidwan Panditaraja V. S. Ramachandra Sastry,
   Sankara Mutt, Bangalore.

7. Prof. Vishva Bandhu Shastri,
   Director, Vishveshvarananda Vedic Research Institute,
   Hoshiarpur.

8. Prof. R. N. Dandekar,
   Professor of Sanskrit, University of Poona,
   Poona. (Member-Secretary)

The Commission will, among other things, survey the existing facilities for Sanskrit Education in Universities and non-University institutions and make proposals for promoting the study of Sanskrit,

परम्परागतां संस्कृतशिक्षाप्रणालीं परीक्ष्य तत्रत्याः के के विशेषाः नवीन-शिक्षाप्रणाल्याम् अन्तर्भाव्यमानाः उपयुज्येरन्, इत्येतदपि असौ विचारयिष्यति।

तम् एनं विषयम् अधिकृत्य तद्विदां मतम् आवाहयितुम् उपन्यस्ता इयं प्रकृतेन आयोगेन प्रश्नावली। इयं च प्रश्नावली विपुलविषयावगाहिनी। तेन हि, ये महाभागाः उत्तरप्रेषणेन अनुजिघृक्षेयुः, न तैः अवश्यमेव प्रतिप्रश्नम् उत्तरम् उदाहार्यम्। यत्र विषयविशेषे येषाम् अभिनिवेशः संबन्धविशेषः वा विशिष्टं ज्ञानं वा स्यात्, तत्र ते स्वमतं तदुपोद्बलकं च युक्तिजातं समासेन प्रदर्शयेयुः, इति सर्वे व्यवहर्तारः अभ्यर्थ्यन्ते। दीयमानम् उत्तरं ज्ञापकं वा यं प्रश्नं स्पृशति, तस्य प्रश्नस्य अङ्कः स्पष्टं निर्देश्यः।

आङ्ग्लभाषया संस्कृतभाषया वा उत्तराणि दातव्यानि। उत्तराणि च 'सदस्य-सचिवः, संस्कृतायोगः, पूना ४' एतम् उद्दिश्य तथा प्रेषणीयानि, यथा १२ दिसम्बर, १९५६ एतत् दिनं यावत् प्राप्येरन्।

इदं च अपरं व्यवहर्तारः प्रार्थ्यन्ते, यत् ते स्वेषाम् उत्तराणाम् अवसाने निजं समग्रं नाम, अधिकारम्, आवासस्थानं च लिखेयुः॥

including research. It will also examine the traditional system of Sanskrit Education in order to find out what features from it can be usefully incorporated into the modern system.

With a view to eliciting informed public opinion on the subject, the Commission has issued the present *Questionnaire*. The *Questionnaire* covers a wide field of inquiry, and it is not intended that all those who are pleased to send replies should necessarily answer every question. Correspondents are requested to favour the Commission with their views and suggestions on matters in which they are particularly interested or concerned, or of which they have special knowledge. Reasons, in brief, may please be given in support of the views expressed. The number of the question to which the answer or memorandum relates should be clearly indicated.

Replies, in English or Sanskrit, may be kindly sent to 'The Member-Secretary, Sanskrit Commission, Poona 4', so as to reach him not later than the 12th of December, 1956.

Correspondents are requested to give their full names, designations, and addresses at the end of their replies.

॥अ॥ सामान्यप्रकरणम्—मूलभूताः केचन प्रश्नाः॥

१. का भूमिका कार्यविशेषः वा संस्कृतविदा अद्यतने भारतस्य राष्ट्रियजीवने निर्वर्तयितव्यः?

२. [क] संस्कृताध्ययनं प्रति भवदीये प्रदेशे कीदृशी जनानां साधारणी मनोवृत्तिः?

[ख] पाठशालासु, महाविद्यालयेषु, विश्वविद्यालयेषु च प्रवर्तमानात् संस्कृताध्ययनात् व्यतिरेकेण, कैः कैः उपायान्तरैः भवदीये प्रदेशे संस्कृतविद्यायाः अभिवृद्धिः क्रियते, संस्कृतसाहित्ये तदनुप्राणितायां संस्कृतौ च आदरः परिपाल्यते? ईदृशस्य आदरस्य अभिवृद्धेश्च अर्थे के उपायाः भवद्भिः सूच्यन्ते?

३. [क] मानविकीं सांस्कृतिकीं च संस्कृतस्य अनर्घताम् आलोच्य, संस्कृताध्ययनविषये महीयः उद्बोधनम् आदरं च भारतीय-गणतन्त्रानुपालितेषु नागरिकेषु समुत्पादयितुं कान् उपायान् उपादेयत्वेन भवन्तः सूचयेयुः?

[ख] कीदृग्भिः विधाभिः 'साहित्य-अकादेमी' (अखिलभारतीय-साहित्य-परिषत्) जनानां संस्कृतवाङ्मयाध्ययनस्य प्ररोचनाय, तद्विषये च आदरसंवर्धनाय, साहाय्यं कर्तुं शक्नुयात्? तेषु तेषु विद्यास्थानेषु प्रतिनिधिभूतानां संस्कृतग्रन्थानाम् (१) आङ्ग्लभाषायां (२) प्रादेशिकभाषासु च अनुवादैः सहकृतानि स्वल्पमूल्यानि संस्करणानि केन्द्राधिशासनस्य राज्याधिशासनानां च द्वारेण 'साहित्य-अकादेमी' स्वयं प्रकाशयेत् अन्यैः वा प्रकाश्यमानानि पुरस्कुर्यात्, इत्येतद्विषये भवतां किं मतम्? [यवन-रोमक-भाषयोः लिखितानां ग्रन्थानाम् आङ्ग्लभाषानुवाद-सहकृत संस्करणानां प्रणयने, 'लोएब-क्लासिकल-लायब्ररी'-संस्थया या सरणिः अनुस्त्रियते, सा अत्र उदाहार्या।]

[ग] द्वितीयस्यां पाञ्चवर्षिक्यां योजनायां संस्कृतशिक्षायाः अभिवर्धनाय के उपायाः भवन्मते अवलम्बनीयाः?

A. General — Some Basic Questions

1. What special rôle has the Sanskritist to play in the national life of India to-day ?

2. (*a*) How would you characterize the general sentiment in your part of the country towards the study of Sanskrit ?

   (*b*) Apart from its study in Pāṭhaśālās, Colleges, and Universities, in what other ways are the cultivation of Sanskrit and interest in its literature and culture maintained in your part of the country ? What steps would you suggest to promote such interest and cultivation ?

3. (*a*) In view of the humanistic and cultural value of Sanskrit what steps would you suggest for engendering among the citizens of the Republic of India a greater awareness for and interest in the study of Sanskrit ?

   (*b*) In what ways can the *Sahitya Akademi* help to popularize and promote interest in the study of Sanskrit literature ? Should the *Sahitya Akademi*, in your opinion, undertake and encourage the publication by the Centre as well as the States, in cheap editions, of representative Sanskrit texts in the different branches of learning, with accompanying translations in (i) English and (ii) the regional languages (in a style like that of the *Loeb Classical Library* of Greek and Latin texts in English, for example) ?

   ✓(*c*) What provisions, in your opinion, need be made in the Second Five Year Plan for the promotion of Sanskrit Education ?

४. [क] अप्येतत् भवताम् अभिमतं यत् कस्माच्चिदपि भारतीयात् शिक्षापीठात् समावर्तमानेन युवजनेन संस्कृतसंस्कृतेः बीजभूतैः अङ्गैः अवश्यम् आत्तपरिचयेन भवितव्यम् इति ?

[ख] के के उपायाः भवतां संमताः, यैः आदृतैः विदेशगामिनः बहवः छात्राः, अधिकारिणः, भारतराष्ट्रियकार्यालयेषु नियुक्ताः कर्मचारिणश्च, न्यूनाधिकया मात्रया एतस्याः संस्कृतेः यथार्थत्वेन परिचायकाः भवेयुः ?

[ग] अप्येतत् भवतां मतम्, यत् विदेशस्थेषु भारतीय-राजदूतावासेषु संस्कृतविदुषां नियुक्तिः क्रियते चेत्, राजदूतावासगतानि सांस्कृतिकानि व्यवसितानि सौकर्यम् आपत्स्यन्ते इति ?

५. निखिलभारतीयेषु केषुचित् आधिकारिकेषु व्यवहारेषु — साधारणविषयान् अधिकुर्वाणः आन्तरराज्यीयः लेखव्यवहारः, आधिशासनिकाः औत्सविकाः च प्रसङ्गाः, विश्वविद्यालय-स्नातकानुशासनम्, शपथपाठनम्, भारतीय-गणतन्त्रस्य कृते वैदेशिकशासनानि उद्दिश्य संदेशना, इत्येवमादिषु — संस्कृतस्य उपयोगः भवद्भिः संभाव्यते किम् ?

६. 'धर्मशिक्षाम्' अधिकृत्य 'विश्वविद्यालय-शिक्षायोगेण' विहितपूर्वाणां शंसनानां निर्वाहे, संस्कृताध्ययनं केन मार्गेण उपयोगिताम् अवाप्नुयात् ? [अस्मिन् विषये द्रष्टव्यम् — 'विश्वविद्यालय-शिक्षायोगस्य प्रवेदनम्,' प्रथमः भागः, १९४९, पृष्ठम् ३०३ ।]

७. [क] अखिले भारते संस्कृतोच्चारणस्य एकरूपतां व्यवस्थापयितुं तेषु तेषु प्रदेशेषु भवन्मते के के उपायाः अवलम्बनीयाः ?

[ख] संस्कृतस्य मुद्रणे लेखने च सर्वत्र एकस्याः एव लिपेः स्वीकरणं (यथा, देवनागर्याः) (१) अखिल-भारतीय-व्यवहृतिषु, (२) तत्तत्स्थानीय-लिप्यन्तराणि प्रयुञ्जानेषु राज्यान्तरेषु च यथाकथमपि संस्कृता-ध्ययनसमुन्नतेः साधकं भविष्यति किम् ? तास्ताः प्रादेशिक्यः लिप्यः (वङ्गीया, आन्ध्रीया, कर्णाटीया, इत्येवमाद्याः) तत्प्रयोगिणीनां प्रादेशिकभाषाणां संस्कृतभाषया संबन्धं द्रढयितुम्, तथैव तत्प्रयोगिणः जनान् संस्कृतेन परिचिततरान् विधातुम्, कियन्मात्रम् उपकारिण्यः भवन्ति इति भवन्तः मन्यन्ते ?

4. (*a*) Do you think that a young person who has passed out of an Indian Educational Institution should necessarily possess some grounding in the elements of Sanskrit culture ?

   (*b*) What steps need to be taken to enable the numerous Indian Students, Officials, and Employees of Indian establishments going to foreign countries to become, in some measure, true interpreters of this culture ?

   (*c*) Do you think that the employment of Sanskrit scholars in Indian Embassies abroad will facilitate the cultural activities of those Embassies ?

5. What are the possibilities of the use of Sanskrit for the purpose of certain official matters of an all-India character, e. g., inter-state communication on general topics, state and ceremonial occasions, University convocations, administration of oaths, and addressing foreign states on behalf of the Republic of India ?

6. In what way can the study of Sanskrit be made serviceable in the implementation of the recommendations made by the University Education Commission regarding 'Religious Education' (vide *Report of the University Education Commission*, Vol. I, 1949, p. 303) ?

7. (*a*) What steps would you suggest for securing uniformity of pronunciation in Sanskrit on an all-India basis for the various parts of the country ?

   (*b*) Will the universal adoption of a single script (e. g. the Devanagari) in printing as well as writing Sanskrit in any way help the promotion of Sanskrit studies (i) in all-India contexts, and (ii) in the various States using local scripts ? How far do you think are the various regional scripts (like Bengali, Telugu, Kannada, etc.) helpful in strengthening the close relation between Sanskrit and the regional languages using those scripts and in bringing Sanskrit nearer to peoples using them ?

[ग] अप्येतत् भवतां मतम्, यत् सरलीकृतस्य मूलभूतस्य वा संस्कृतस्य विकासनं समर्थ्येत इति ? यदि एवम्, काः भवतां तद्विषये सूचनाः ?

८. [क] शिक्षायाः लोकसेवायाश्च क्षेत्रे, प्रादेशिकभाषायाः उपयोगः संप्रति सानिर्बन्धम् उपपाद्यमानः, संस्कृताध्ययने किंपरिणामः भविष्यति इति भवन्तः मन्यन्ते ?

[ख] प्रादेशिकभाषाणां प्रादेशिकसाहित्यानां च अभिवृद्धेः संस्कृताध्ययनं कियदवधि उपकरिष्यति ?

[ग] अखिलभारतीयायाः मानविक-वैज्ञानिक-यान्त्रिक-पारिभाषायाः प्रणयने, अखिलभारतोपयोगार्थं पाठ्यपुस्तकानां विरचने च, संस्कृतं कियदवधि उपकारकं भवेत् ?

[घ] इदानींतनीनां भारतीयभाषाणाम् उच्चतराध्ययनस्य कृते संस्कृतम् आवश्यकविषयत्वेन नियोज्यताम् अर्हति, इति अस्ति किं भवताम् अभिमतम् ?

९. संस्कृत-विश्वविद्यालय-प्रतिष्ठापनस्य उपकल्पनायाः विषये किं भवन्तः मन्यन्ते ? अन्येषां विश्वविद्यालयानां कार्यक्षेत्रात् विशिष्टं किं नु खलु सुनिश्चितम् अस्य कार्यक्षेत्रं भवितुम् अर्हति ? ईदृशं च विश्वविद्यालयं भारतस्य आधुनिकया अवस्थया कियदवधि समकक्ष्यं प्रचलितुं शक्नुयात् ?

॥ आ ॥ संस्कृतशिक्षायाः नवीना पारम्परिकी च पद्धतिः ॥

१०. [क] साधारण्यां भारतीयायां राष्ट्रियशिक्षाप्रणाल्यां भवन्मतेन कीदृशं संस्कृताध्ययनस्य स्थानं भवितुम् अर्हति ?

[ख] कः प्रयोजनविशेषः अनेन अध्ययनेन साधनीयः ?

[ग] अपि भवताम् एतत् अभिमतम्, यत् संस्कृतस्य अध्ययनं शिक्षा-प्रणाल्याः कस्यांचित् कक्षायाम् आवश्यिकं कार्यम् ? यदि अभिमतम्, (१) सर्वेषामेव च्छात्राणां कृते, (२) छात्रविशेषाणां वा कृते, तत् आवश्यिकं भवत्, भवद्भ्यः रोचेत ? यदि च एतयोः उत्तरः विकल्पः भवतां संमतः, तत् कीदृशां छात्राणां कृते, कस्यां वा कक्षायां, तत् आवश्यिकं क्रियताम् ?

[घ] भारतीय-शिक्षा-प्रणाल्यां संस्कृतस्य यत् स्थानम्, तत् पाश्चात्य-शिक्षाप्रणालीगतेन ग्रीक-लातीन-भाषयोः स्थानेन कियन्मात्रम् उपमीयेत ?

(c) Do you think that there is a case for the evolving of a simplified or basic Sanskrit ? If so, what suggestions have you to offer in that connexion ?

8. (a) What effect, do you think, will the present-day insistence upon the use of the regional language in the domain of education and public service have on the study of Sanskrit ?

(b) To what extent will the study of Sanskrit assist in the development of regional languages and literatures ?

(c) How far will Sanskrit be helpful in the building up of an all-India humanistic, scientific and technical terminology, and in the preparation of text-books for all-India use ?

(d) Would you suggest that Sanskrit should be made a compulsory subject for higher studies of modern Indian languages ?

9. What is your view about the proposal of a Sanskrit University ? What exactly should be its scope, as distinguished from that of other Universities ? How far will such a University be able to keep abreast of modern conditions in India ?

B. Sanskrit Education — The Modern as well as the Traditional Systems

10. (a) What, in your opinion, should be the place of the study of Sanskrit in the general scheme of a national education for India ?

(b) What special purpose should this study be expected to serve ?

(c) Do you think that the study of Sanskrit should be made compulsory at any stage of education ? If so, would you like it to be made compulsory (i) for all students, or (ii) for a special class of students ? If you favour the latter alternative, for what class of students should it be made compulsory, and at what stage ?

(d) How far can the study of Sanskrit in the scheme of education in India be regarded as comparable to the study of Greek and Latin in the scheme of education in the West ?

११. [क] सुसंश्लिष्टायां संस्कृतशिक्षाप्रणाल्यां के के कक्षास्तराः भवेयुः ?

[ख] एकैकस्य कक्षास्तरस्य कियान् कालपरिच्छेदः भवेत् ?

[ग] तेषु तेषु कक्षास्तरेषु पाठ्यक्रमस्य अनुस्यूतिम् उद्देशैक्यं च परिरक्षितुं के उपायाः आवश्यकाः ?

[घ] प्रतिकक्षं साधारण्येन किंरूपः विषयपाठनक्रमः स्यात् ?

[ङ] संस्कृताध्यापनविषये काः काः विभिन्नाः पद्धतयः संप्रति भारते अनुस्रियन्ते ? प्रतिकक्षं कतमां पद्धतिम् उत्तमां भवन्तः मन्यन्ते ? संस्कृताध्यापनार्थं का भाषा शिक्षामाध्यमत्वेन प्रयुज्यताम् ?

१२. [क] अपि भवतां प्रदेशे (१) विश्वविद्यालयेषु (२) माध्यमिकविद्याशालासु च संस्कृताध्ययनार्थं यथावश्यकानि सुसाधनानि वर्तन्ते इति भवन्तः मन्यन्ते ?

[ख] शास्त्रीयग्रन्थाध्ययनार्थं संप्रति विश्वविद्यालय-संस्कृतपाठनक्रमे या व्यवस्था वर्तते, सा पर्याप्ता इति भवन्तः मन्यन्ते किम् ? महाविद्यालयेषु विश्वविद्यालयेषु च ईदृशां ग्रन्थानाम् अध्यापनं प्रभविष्णु भवेत्, इत्येतदर्थे कीदृशी विधेयपदवी भवद्भिः सूच्येत ?

१३. [क] माध्यमिकविद्याशालागतसंस्कृताध्ययनस्य यत् साम्प्रतिकं स्वरूपम् इयत्ता च वर्तेते, तयोः महाविद्यालयेषु विश्वविद्यालयेषु च क्रियमाणायां तस्य संस्कृताध्ययनस्य अभिवृद्धौ कीदृशः परिणामः संवृत्तः ?

[ख] माध्यमिकविद्याशालावस्थायाम् अधीयमानासु भाषासु कीदृशं पदं भवतां मते संस्कृताय दिश्येत ?

[ग] मातृभाषा, आङ्गलभाषा, संस्कृतम्, हिन्दी च (अथवा, हिन्दीभाषिणां विद्यार्थिनां कृते अन्या काचित् प्रादेशिकी भाषा), इति चतसृणां भाषाणां माध्यमिकविद्याशालायाम् अध्ययनं शक्यं प्रशस्तं वा, इत्येतद्विषये किं भवतां मतम् ?

[घ] यावता अंशेन एतासां भाषाणाम् अध्ययनं माध्यमिकविद्याशालाभिः समन्वेति, तावति अंशे भवदभिप्रायानुसारं तासां मध्ये श्रेयस्त्वेन प्रेयस्त्वेन च कः क्रमः अवलम्बनीयताम् अर्हति ?

[ङ] एतासां भाषाणाम् अध्यापनार्थं माध्यमिकविद्याशालानां समयसारणीषु उपलभ्यमानाः घटिकाः कथं भवन्तः व्यवस्थापयेयुः ?

[च] भवतां प्रदेशे माध्यमिकविद्याशालासु यानि संस्कृतपाठ्यपुस्तकानि उपयुज्यन्ते, तेषां गुणदोषविषये किं भवतां मतम् ?

11. (*a*) What should be the various stages in an integrated scheme of Sanskrit Education ?

    (*b*) What should be the duration of each stage ?

    (*c*) What steps are necessary to maintain the continuity of courses and uniformity of purpose at different stages ?

    (*d*) What should be the general syllabus of subjects at each stage ?

    (*e*) What different methods of teaching Sanskrit are at present in vogue in India ? What, in your opinion, is the best method at each stage ? What should be the medium of instruction for teaching Sanskrit ?

12. (*a*) Do you think that adequate facilities are at present available for the study of Sanskrit in (i) Universities and (ii) Secondary Schools in your part of the country ?

    (*b*) Do you consider the provision for the study of Sāstric texts made at present in the University Sanskrit courses adequate ? What steps do you suggest for securing efficient teaching of such texts in Colleges and Universities ?

13. (*a*) In what way have the nature and extent of the study of Sanskrit in Secondary Schools today affected the proper cultivation of that subject in Colleges and Universities ?

    (*b*) What position, in your opinion, should be assigned to Sanskrit among languages to be studied at the Secondary School stage ?

    (*c*) What is your opinion about the possibility and advisability of learning four languages in Secondary Schools, namely, the mother-tongue, English, Sanskrit, and Hindi (or some other regional language for Hindi-speaking students) ?

    (*d*) What, according to you, should be the order of priority and preference among these languages so far as their study in Secondary Schools is concerned ?

    (*e*) How would you arrange the hours available in the time-tables of Secondary Schools for the teaching of these languages ?

    (*f*) What in your view are the merits and defects of Sanskrit text-books now being used in Secondary Schools in your part of the country ?

१४. [क] कासु कासु अध्ययनशाखासु संस्कृतभाषया यथोचितः परिचयः अपेक्ष्यते ? तेषां विषयाणां पाठनक्रमेषु संस्कृतस्य अन्तर्भावः भवद्भिः शस्यते किम् ?

[ख] विश्वविद्यालयेषु पाठ्यमानानां संस्कृतातिरिक्तानां विषयाणां क्षेत्र-विशेषेषु संस्कृतग्रन्थैः उपदीकृताः प्रत्यंशाः तेषां तेषां विषयाणां पाठन-क्रमेषु पूरकत्वेन निवेशनीयाः, यथा — संस्कृतकाव्यनाटकालंकार-शास्त्राणाम् आङ्ग्लसाहित्यपाठनक्रमे निवेशनम्, भारतीयगणितायुर्वेद-दर्शनधर्मशास्त्रादीनाम् इतिहासस्य च तेषु तेषु विषयेषु यथा-संख्यं निवेशनम् — इत्थं केचन सूचयन्ति। ताम् एतां सूचनाम् अन्तरेण किं भवन्तः ब्रूयुः ?

१५. पालिभाषायाः प्राकृतभाषाणां च अध्ययनं संस्कृताध्ययनस्य पूरकत्वेन पर्यायत्वेन वा भवद्भिः विभाव्यते ? भवन्मतेन एते द्वे (१) माध्यमिक-विद्याशालासु (२) विश्वविद्यालयेषु च फलवत्तया कथं सुग्रथितताम् आपादनीये ?

१६. भवन्मतम् अनुसृत्य, (१) पाठशालासु संस्कृतमहाविद्यालयेषु च, (२) माध्यमिकविद्याशालासु, (३) महाविद्यालयेषु विश्वविद्यालयेषु च संस्कृतम् अधीयानानां विद्यार्थिनां संख्या उत्तरोत्तरम् अल्पीयस्त्वं भजन्ती यद् दरीदृश्यते, तस्य कानि प्राधान्येन कारणानि ?

१७. [क] भवत्प्रदेशे संस्कृतमहाविद्यालयेषु पाठशालासु च विविधशास्त्राणाम् अध्ययनार्थम् उपलभ्यमानानि सुसाधनानि किंस्वरूपाणि कियन्ति च, विशेषतः अनन्तरोक्तेषु विषयेषु —(१) वेदाः (श्रौतसंहिताः), (२) शब्दशास्त्रम् (निरुक्तेन, शिक्षया, विविधसंप्रदायगतेन विविधाङ्गोपेतेन व्याकरणेन च सहकृतम्), (३) अलंकारशास्त्रम्, (४) दर्शनानि — प्राच्य-नव्य-न्यायौ, वैशेषिकम्, साङ्ख्ययोगौ, मीमांसा, वेदान्तः, तन्त्राणि, आर्हतसमयः, सौगतमतं च, (५) धर्मशास्त्रम्, पुराणेतिहासौ, शिल्पशास्त्रम्, ज्यौतिषम्, आयुर्वेदः च ?

[ख] शास्त्राणाम् अध्यापनस्य, तेषु च स्वतन्त्रनूतनग्रन्थप्रणयनस्य, गुणवत्तायां परिमाणे वा या काचित् अवनतिः स्यात्, सा किंमूला इति मन्यन्ते भवन्तः ?

[ग] शास्त्राणाम् अध्ययनाध्यापनयोः या परम्परागता सरणिः, सा केनाचित् प्रकारेण उपस्कृता सती भूयोऽपि तम् उद्योगं प्राणवत्तरं वीर्यवत्तरं च करिष्यति — अपि अस्ति एतत् भवताम् मतम् ?

14. (*a*) What branches of study stand in need of adequate grounding in Sanskrit? Would you recommend the inclusion of Sanskrit in the curricula of those subjects?

(*b*) What have you to say about the suggestion that the courses of studies in different non-Sanskrit subjects at the University level should include, in a complementary way, some study of the Sanskrit contributions in the respective fields covered by those subjects, e. g. of Sanskrit poetry, drama, and criticism in the English Literature course, and of the history of Indian Mathematics, Medicine, Philosophy, Law, etc. in the courses of those respective subjects?

15. Do you regard the study of Pali and the Prakrits as complementary or as alternative to the study of Sanskrit? How, in your opinion, can these two be fruitfully co-ordinated in (i) Secondary Schools and (ii) Universities?

16. What, in your view, are the main factors responsible for the decline in the number of students taking to Sanskrit studies in (i) Pāṭhaśālās and Sanskrit Colleges, (ii) Secondary Schools, and (iii) Colleges and Universities?

17. (*a*) What is the nature and extent of the facilities available in Sanskrit Colleges and Pāṭhaśālās in your region for the study of the various Śāstras — especially of (i) Veda (including Śrauta), (ii) Śabdaśāstra including Nirukta, Śikṣā, and Vyākaraṇa in its various schools and aspects, (iii) Alaṁkāra, (iv) Darśanas like Nyāya (Prācīna and Navya) and Vaiśeṣika, Sāṁkhya and Yoga, Mīmāṁsā, Vedānta, Tantras, Jainism, and Buddhism, and (v) Dharmaśāstra, Itihāsa-Purāṇa, Śilpaśāstra, Jyotiṣa, and Āyurveda?

(*b*) What factors, in your opinion, are responsible for the deterioration, if any, in the quality and amount of Śāstric teaching and in the production of original works in these branches?

(*c*) Do you think that any modification is necessary in the traditional method of Śāstric teaching and study in order to make it a more live and vigorous pursuit again?

[घ] संस्कृतमहाविद्यालयेषु पाठशालासु च वर्तमानासु संस्कृताध्यापन-पद्धतिषु संस्कृतपाठनक्रमे च भवन्मतेन के गुणाः दोषाः वा? तद्गतानां गुणानाम् अनुपरोधेन दोषाणां निवर्हणाय कान् उपायान् भवन्तः सूचयेयुः?

१८. [क] संस्कृतमहाविद्यालयेभ्यः पाठशालाभ्यः च समावर्तमानानां विद्यावताम् आजीविकार्थं कानि समुचितानि व्यवसायद्वाराणि सान्ति इति भवतां मतिः?

[ख] तानि च कियत्प्रमाणं भवत्प्रदेशे उपलभ्यन्ते?

[ग] भवतां प्रदेशे विद्यमानानां परम्परानुसारिणां संस्कृतविदुषाम् आर्थिक्याम् अवस्थायाम् अस्ति किमपि गभीरं वैकल्यम्? अस्ति चेत्, कीदृशं तत्? अपि संभवेत् एतस्याः आर्थिक्याः अवस्थायाः विरोपणम्, तत्पदे नवस्य वा कस्याचित् साधनस्य प्रत्याधानम्? कतमे खलु आर्थिकानिर्वाहाधाराः भवद्भिः सूच्येरन्, यैः उपयुज्यमानैः परम्परानुसारिणः संस्कृतपण्डिताः यथापूर्वं स्वीयम् अध्ययना-ध्यापनानुष्ठानात्मकं कार्यं निरन्तरायं कर्तुं प्रभवेयुः?

[घ] संस्कृतमहाविद्यालयेषु पाठशालासु च प्रचलिताः पारम्परिक-पाठनक्रमाः यदि पुनर्घटिताः भवेयुः, तर्हि समुत्तीर्णतत्तत्संस्थापरीक्षाः विद्यार्थिनः समुत्तीर्ण-विश्वविद्यालय-माध्यमिकविद्याशाला-परीक्षैः समानोपाधिकैः विद्यार्थिभिः सह व्यावहारिकेषु तेषु तेषु अवकाशेषु स्पर्धितुं शक्नुयुः, इति भवन्तः मन्यन्ते ननु? यदि एवम्, कतमया दिशा एतत् पुनर्घटनं क्रियताम्?

[ङ] भवन्मते, तीर्णसंस्कृतपरीक्षाः जनाः समुचितां जीविकाम् उपलब्धुं शक्नुयुः, इत्येतदर्थे केन्द्राधिशासनेन राज्याधिशासनैश्च के उपायाः उररीकर्तव्याः?

[च] हिन्दूनां धर्मदायस्य देवस्वस्य च संधारणाय ये आधिशासनिकाः विभागाः विद्यन्ते, तेषु तीर्णसंस्कृतपरीक्षाणां विद्यार्थिनां नियुक्तेः काः सान्ति संभावनाः?

१९. [क] भवतां प्रदेशे तासु तासु वैदिकशाखासु वेदानां कण्ठपठनस्य साम्प्रतं का अवस्था विद्यते? तत्रापि सामगान-विद्यायाः का स्थितिः? एतासां परम्पराणां परिरक्षणार्थं कानि साधनानि संश्रयणीयानि इति भवन्तः मन्यन्ते?

(*d*) What, in your opinion, are the merits and defects of the methods of teaching Sanskrit, as also of the courses of study, in Sanskrit Colleges and Pāṭhaśālās? Retaining the merits, what steps do you suggest to remedy the defects?

18. (*a*) What, in your opinion, are the proper openings in life for students passing out of Sanskrit Colleges and Pāṭhaśālās?

(*b*) To what extent are these available in your part of the country?

(*c*) Is there any serious dislocation of the economic background for the old-type Sanskrit scholars in your area, and, if so, in what way? Is there a possibility of restoring this economic background, or substituting some new means in the place of the old? What various sources of financial support would you propose for enabling Sanskrit Pandits of the traditional type to carry on their *adhyayana*, *adhyāpana* and *anuṣṭhāna* as before?

(*d*) Do you think that, by reorganising the traditional courses in Sanskrit Colleges and Pāṭhaśālās, there is a possibility of students who pass out of them being able to compete for opportunities of life with persons of equivalent qualifications who pass out of Schools and Universities? If so, on what lines should the reorganisation be effected?

(*e*) What steps, in your opinion, are necessary on the part of the Central and State Governments to open up possibilities of career for persons passing Sanskrit examinations?

(*f*) What are the possibilities of employment for students passing Sanskrit examinations in the Government Departments of Hindu Religious Endowments and Devasvam?

19. (*a*) What is the present condition of learning by rote the Veda in its different schools (*Vedādhyayana*) in your part of the country? What in particular is the state of the knowledge of *Sāmagāna*? What steps do you suggest for preserving these traditions?

[ख] संस्कृतभाषामयाणाम् इतिहासपुराणानां जनतार्थानि व्याख्यानानि, धर्मदर्शनविषयकाणि च जनतार्थानि विवेचनानि संप्रति भवत्प्रदेशे काम् अवस्थां भजन्ति? अपि दृश्यते जनानाम् एतेषु आरम्भेषु पर्याप्तः आदरः? ईदृशानि व्याख्यानानि विवेचनानि च कुर्वन्तः पण्डिताः यथावश्यकयोग्यतां दधते किम्? अपि संभवति एतादृशाम् आरम्भाणां सुष्ठुतरं व्यवस्थापनम्, येन ते संस्कृतमहाविद्यालयेषु पाठशालासु च गृहीतविद्येभ्यः वृत्तिप्रदाः भवेयुः?

[ग] संस्कृतवाङ्मये उपवर्ण्यमानाः कलानां, शिल्पानां, यन्त्रविज्ञानानां च याः प्राचीनाः भारतीयाः परम्पराः, तासां क्षेमसंवर्धनाय भवदभिप्रायानुसारेण कीदृशाः अवकाशाः विद्यन्ते?

[घ] के उपायाः उपादीयमानाः संप्रति आयुर्वेदं प्राणवत्तरम् अर्थवत्तरं च कुर्युः?

[ङ] गणितज्यौतिषादयः संस्कृतविद्याशाखाः आधुनिकविज्ञानविद्यानिकाये स्वं स्वम् उचितं पदं लभेरन्, इत्येतदर्थे के उपायाः भवद्भिः सूच्यन्ते?

२०. [क] संस्कृताध्ययनस्य पारम्परिक्यां नवीनायां च पद्धतौ गुणानां दोषाणां च गुरुलाघवं कथम् अवस्थितं मन्यन्ते भवन्तः?

[ख] पारम्परिक्यां नवीनायां च इति उभयोः पद्धत्योः ये गुणाः, तान् सर्वान् दधत्याः संस्कृतशिक्षाप्रणाल्याः उद्भावनं कियत्पर्यन्तं साध्यं भवेत्? अस्मिन् अर्थे कान् उपायान् भवन्तः निर्दिशेयुः?

२१. [क] कियत्पर्यन्तम् एतत् आवश्यकं यत् पारम्परिकाः नवीनाश्च संस्कृतविद्वांसः भारतीयानां प्रत्नवस्तूनाम् अभिज्ञाः स्युः, प्राचीनभारतीयलिपीनां च व्यवहारक्षमं ज्ञानं संपादयेयुः इति?

[ख] याः नवीनाः पद्धतीः अनुसृत्य संस्कृतस्य भाषात्वेन ऐतिहासिकं तुलनात्मकं च अध्ययनं क्रियते, तासां समावेशनं प्रौढकक्षासु अधीयानानां महाविद्यालय-विश्वविद्यालयगतानां पाठशालागतानां च सर्वेषां संस्कृतविद्यार्थिनाम् अध्ययने स्यात्, इति भवन्तः समर्थयेरन् ननु?

(*b*) What is the present state of popular expositions of Sanskrit Itihāsa and Purāṇa, as also of popular discourses on religion and philosophy in your part of the country? Do people evince sufficient interest in these activities? Are the persons giving such expositions and discourses adequately qualified? What do you think of the possibilities of this kind of work being better organised, thereby making it a source of employment for students passing out of Sanskrit Colleges and Pāṭhaśālās?

(*c*) What, in your opinion, are the possibilities of maintaining and promoting the ancient Indian traditions of arts, crafts, and other technical disciplines embodied in Sanskrit texts?

(*d*) What steps need to be taken to make Āyurveda (Indian medical science as preserved in Sanskrit texts) more live and useful today?

(*e*) What ways would you suggest to make such branches of Sanskrit study as Gaṇita and Jyotiṣa take their proper place in the body of scientific knowledge today?

20. (*a*) What, in your opinion, are the comparative advantages and drawbacks of the traditional method and the modern method of the study of Sanskrit?

(*b*) How far is it feasible to evolve a pattern of Sanskrit Education, which will incorporate the merits of both the traditional and modern methods? What measures would you propose in this connexion?

21. (*a*) To what extent should it be necessary for Sanskrit scholars, both of the traditional type and of the modern type, to familiarise themselves with Indian antiquities and to obtain some practical knowledge of ancient Indian scripts?

(*b*) Would you advocate the introduction of modern methods of historical and comparative study of Sanskrit as a language for all classes of Sanskrit students in the higher stages, both in Colleges and Universities and in Pāṭhaśālās?

२२. [क] एतत् संस्कृताध्यापनस्य एकतमम् उद्देश्यम्, यत् संस्कृतविद्यार्थिनः गीर्वाणवाण्या व्यवहर्तुं शक्नुयुः, इति भवतां भाति किम्? यदि एवम्, संस्कृतविद्यार्थिषु संस्कृतभाषणलेखनक्षमतां निर्मातुं कान् उपायान् भवन्तः सूचयेयुः?

[ख] अप्रगल्भवयसः कुमाराः कुमारिकाः च संस्कृतभाषया संस्कृत-संस्कृत्या च केनापि रूपेण यथा परिचिताः भवेयुः तथा कार्यम्, इति भवन्तः मन्यन्ते किम्? यदि एवम्, एतत् उपेयम् आसादयितुं कान् उपायान् भवन्तः सूचयेयुः?

[ग] अप्येतत् भवतां मतम्, यत् अवरासु कक्षासु समाश्रीयमाणा संस्कृताध्यापनपद्धतिः सुखा गुणवत्तरा च क्रियमाणा समर्थ्येत इति? यदि एवम्, तद्विषये काः सूचनाः भवन्तः कुर्युः?

॥ इ ॥ संस्कृत-संशोधनम् ॥

२३. [क] संस्कृतविद्या-संशोधनार्थं संप्रति (१) विश्वविद्यालयेषु, (२) तासु तासु संशोधनसंस्थासु, (३) तत्तत्स्थानीयपीठेषु च या साधन-सामग्री उपलभ्यते, सा पर्याप्ता इति भवन्तः मन्यन्ते किम्? भवत्प्रदेशे विद्यमानां पर्यवस्थितिम् अन्तरेण अस्ति किमपि सविशेषं भवतां विवक्षितम्?

[ख] अपि सन्ति भवतां प्रदेशे प्रातिस्विकत्वेन व्यवस्थापितानि कानिचित् संशोधनपीठानि? के तेषाम् अर्थार्जनोपायाः? तेषां समुचितं प्रवर्तनाय, कार्यफलनिष्पादनस्य तथैव संशोधनगुणवत्तायाः पर्याप्तत्वस्य परिपालनाय च, कान् उपायान् भवन्तः निर्दिशेयुः?

[ग] संस्कृतस्य कृते तदानुषङ्गिकाणां विषयाणां च कृते प्रतिराज्यं संशोधनपीठेन भवितव्यम्—अस्ति वा एतत् भवतां मतम्? एतादृशां प्रादेशिक-संस्कृतसंशोधनपीठानां संविधानं (निर्माणप्रकारः वा), योजना, कार्यं च किंविधं स्यात्? ईदृशानां संशोधनपीठानां निर्वाहः किमाश्रयः स्यात्? एषु संशोधनपीठेषु आधिशासानिकं नियन्त्रणं भवताम् अभिमतं किम्?

[घ] संस्कृतसंशोधनस्य के प्रधानाः प्रकाराः, काः वा समुपेक्षिताः सरण्यः सविशेषं प्रवर्तनार्हाः, इति भवन्तः मन्यन्ते?

[ङ] सामान्येन भारते देशे, विशेषेण च भवतां प्रदेशे, संस्कृतसंशोधनार्थं याः पद्धतयः अनुस्रियन्ते, तासु भवन्मतानुसारेण कीदृशी न्यूनता विद्यते?

[च] संशोधनफलस्य उच्छ्रायणार्थं कान् उपायान् भवन्तः आद्रियेरन्?

22. (*a*) Do you think that one of the aims of Sanskrit teaching should be to enable students to express themselves in Sanskrit? If so, what measures do you suggest for producing in students a facility for speaking and writing Sanskrit?

(*b*) Do you consider it desirable to familiarise boys and girls of tender age with Sanskrit language and culture in some form? If so, what ways and means do you suggest for achieving this end?

(*c*) Do you think that there is a case for simplifying or reforming the method of teaching Sanskrit in the early stages? If so, what suggestions have you to offer in that connexion?

C. Sanskrit Research

23. (*a*) Do you consider the provision available at present for research in Sanskrit adequate (i) in Universities, (ii) in various Research Institutions, and (iii) in locally organised bodies? Have you anything particular to say with regard to the conditions obtaining in your part of the country?

(*b*) Are there any privately organised Research Institutes in your part of the country? What are their resources? What measures would you suggest for their functioning properly and maintaining an adequate output of work and standard of research activity?

(*c*) Are you of the opinion that there should be a Research Institute for Sanskrit and allied subjects in each State? What should be the constitution, programme, and function of such regional Research Institutes? From what sources should the expenses of such Research Institutes be met? Do you favour Government control?

(*d*) What major forms or neglected lines of Sanskrit research, according to you, need to be specially sponsored?

(*e*) What, in your opinion, are the drawbacks in the methods of Sanskrit research employed in India in general and in your region in particular?

(*f*) What steps would you suggest to step up the output of research?

[छ] संस्कृतविद्याविषये ये विविधाः संशोधनात्मकाः उपक्रमाः प्रवर्त्यन्ते, तेषां सुसंधानाय किंविधं साधनतन्त्रं भवन्तः शंसेयुः ?

[ज] भवत्प्रदेशे संस्कृतमहाविद्यालयेषु पाठशालासु च संशोधनार्थम् अस्ति कोऽपि अवकाशः साधनसामग्री वा ? यदि वा असौ अपर्याप्ता स्यात्, कान् उपायान् तद्विषये भवन्तः निर्दिशेयुः ?

१४. [क] अप्रकाशितानां प्राक्प्रकाशितानां वा ग्रन्थानां सुपरीक्षितानि संस्करणानि, स्वतन्त्रप्रबन्धाः, व्याख्यात्मिकाः कृतयः—इत्याद्यात्मकं यत् संस्कृतविषये विहितस्य संशोधनस्य फलितम्, तस्य प्रकाशनाय कीदृशम् आनुकूल्यं भवतां प्रदेशे उपलभ्यते ? अपि भवतां मतेन पर्याप्तं तत् ?

[ख] केन प्रकारेण कियत्प्रमाणं वा केन्द्राधिशासनं राज्याधिशासनानि च ईदृशां ग्रन्थानां प्रकाशने साहाय्यं कुर्युः ?

[ग] अप्रकाशितानां महार्हसंस्कृतग्रन्थानां प्रकाशनं कया विधया क्षेपीयः स्यात् ?

[घ] अपि सन्ति भवतां प्रदेशे केचित् महार्हाः संशोधनात्मकाः ग्रन्थाः अप्रकाशिताः सामिप्रकाशिताः वा अवतिष्ठमानाः ? अपि विदिताः भवतां महार्हाः केऽपि संशोधनात्मकाः उपक्रमाः अयथोचितं संघटिताः, अपर्याप्तं पोषिताः वा ?

१५. [क] भवतां प्रदेशे प्रातिस्विकेषु संग्रहेषु अवस्थितानि संस्कृतहस्तलिखितानि यथोचितं परिरक्ष्यन्ते ननु ? एतादृशसंग्रहाणां स्वामिनः साधारणाः च जनाः तादृशहस्तलिखितानां महत्त्वं विद्युः, इत्येतदर्थे कान् उपायान् पश्यन्ति भवन्तः ?

[ख] संस्कृतहस्तलिखितानां संचयनं भवत्प्रदेशे सम्यक् संघटितं ननु ?

[ग] भवत्प्रदेशे विद्यमानानां हस्तलिखितालयगतानां संस्कृतहस्तलिखितानां दशा संरक्षणे सूचीप्रणयने च परितोषिणी ननु ?

[घ] अपि च तेषु हस्तलिखितालयेषु हस्तलिखितानाम् उद्धारदानम्, अनुलेखनम्, छायालेखाः, अणुच्छायिकानि, अणुच्छायिकवाचनं च — एतेषां कर्मणां निर्वर्तने पर्याप्तम् आनुकूल्यं वर्तते किम् ?

१६. भवतां प्रदेशे ग्रन्थालयेषु संस्कृतग्रन्थानां संस्कृतहस्तलिखितानां च परिशीलनविषये उद्धारदानविषये वा उपलभ्यमानम् आनुकूल्यं किंरूपं कियत्प्रमाणं वा ?

(*g*) What machinery would you propose for the proper co-ordination of the various research activities in the field of Sanskrit studies ?

(*h*) Is there any scope or provision available for research in Sanskrit Colleges and Pāṭhaśālās in your part of the country ? If it is not adequate, what measures would you suggest in that respect ?

24. (*a*) What facilities are at present available in your part of the country for the publication of the results of research in Sanskrit, e. g., critical editions of unpublished texts or of texts already published, original treatises, interpretative works, etc. ? Do you consider them adequate ?

(*b*) In what way and to what extent should the Central and State Governments subsidise the publication of such works?

(*c*) In what way can the publication of important unpublished Sanskrit texts be speeded up ?

(*d*) Are there any important pieces of research work lying unpublished or partly published in your region ? Do you know of any undertakings of high research value which are inadequately organised or insufficiently patronised ?

25. (*a*) Are the Sanskrit manuscripts lying in private collections in your part of the country properly safeguarded ? What steps would you propose for making the owners of such collections and the general public aware of their importance ?

(*b*) Is the work of collecting Sanskrit manuscripts adequately organised in your region ?

(*c*) Is the condition of Sanskrit manuscripts in the manuscript libraries in your region satisfactory in respect of preservation and cataloguing ?

(*d*) Are the facilities for the loan, copying, and preparation of photostats and microfilms of manuscripts and for the reading of microfilms adequate in those libraries ?

26. What is the nature and extent of facilities available in the libraries in your part of the country for consultation and issue of Sanskrit books and manuscripts ?

२७. भारतीयैः वैदेशिकैश्च आधुनिकैः विद्वद्भिः संस्कृतविषये विहितानां संशोधनानां फलानि (१) पारम्परिकपण्डितानां (२) साधारणजनानां च गोचरतां नेतुं भवदभिमतेन कानि उपस्करणानि प्रयोक्तव्यानि ?

२८. विदेशगतेषु वस्तुसंग्रहालयेषु ग्रन्थालयेषु च (विश्वजनीनेषु व्यक्तिगतेषु वा) रक्षितानां संस्कृतहस्तलेखानां, भारतविद्याविषयिणः सामग्र्यन्तरस्य च, अविलम्बेन प्रकाशनं साधयितुं राष्ट्राधिकारिभिः के मार्गाः के च उपायाः भवन्मते अवलम्बनीयाः ?

॥ ई ॥ संस्कृताध्ययनस्य संस्कृतशिक्षायाः च संघटनं प्रशासनं च ॥

२९. अप्येतत् भवन्मत्यनुसारेण आवश्यकम्, यत् केन्द्राधिशासनेन अखिल-भारतीया काचित् संस्कृतसमितिः संस्कृतादेशिनी वा प्रतिष्ठाप्येत ? यदि एवम्, भवन्मतानुसारम् एतस्याः समितेः आदेशिन्याः वा संविधानं (निर्माणप्रकारः वा), कार्यम्, अधिकारश्च कीदृशः स्यात् ? अपि ईदृशां समितीनाम् आदेशिनीनां वा तेषु तेषु राज्येष्वपि प्रतिष्ठापनं भवद्भ्यः रोचेत ?

३०. [क] उत्तरोक्तासु संस्थासु नियुज्यमानानां संस्कृताध्यापकानां कनिष्ठया मात्रया का योग्यता स्यात् — (१) माध्यमिकविद्याशालाः, (२) महाविद्यालयाः, (३) विश्वविद्यालयाः, (४) संस्कृतमहाविद्यालयाः, पाठशालाश्च ?

[ख] संस्कृताध्यापकानां कृते अध्यापनतन्त्राभ्यसनम् आवश्यकम् अस्ति वा? अस्ति चेत्, उपरि निर्दिष्टेषु अध्यापकवर्गेषु केषां तत् आवश्यकम्? अपि च, एतत् अभ्यसनं नियुक्तेः प्राक् वा पश्चात् वा संपाद्येत ?

[ग] यथावश्यकयोग्यतां दधानाः तत्तद्वर्गीयाः अध्यापकाः पर्याप्ततया भवत्प्रदेशे उपलभ्यन्ते किम् ?

[घ] विविधवर्गीयाणां संस्कृताध्यापकानां संस्कृतपीठप्रधानानां च सेवायाः समयान् अधिकृत्य अस्ति कापि भवतां विवक्षा ? किं नु ते विद्याशालासु महाविद्यालयेषु च वर्तमानैः अन्यविषयाध्यापकैः समानार्हतां प्रापणीयाः ?

27. What steps, in your view, need to be taken to make the results of the researches in the field of Sanskrit by modern scholars, Indian and foreign, known (i) to traditional Pandits and (ii) to the general public ?

28. What ways and means at the national level would you suggest to help speedy publication of unpublished Sanskrit manuscripts and other Indological material preserved in museums and libraries (public and private) in foreign countries ?

D. Organisation and Administration of Sanskrit Studies and Education

29. Do you think that it is necessary to set up at the Centre an All-India Board or Directorate of Sanskrit Education ? If so, what, in your opinion, should be the constitution, functions, and powers of such a Board or Directorate ? Do you favour the setting up of such Boards also by the different States ?

30. (*a*) What should be the minimum qualifications of Sanskrit teachers in (i) Secondary Schools, (ii) Colleges, (iii) Universities, and (iv) Sanskrit Colleges and Pāṭhaśālās ?

(*b*) Is any pedagogical training necessary for Sanskrit teachers ? If so, for which categories of teachers mentioned above ? What should be the content and duration of such training ? Should the training be given before or after employment ?

✓ (*c*) Are adequately qualified Sanskrit teachers of the various categories available in sufficient numbers in your region ?

(*d*) What have you to say about the terms and conditions of service for Sanskrit teachers of different categories and for heads of Sanskrit Institutions ? Should they be put on the same footing as teachers of other subjects in Schools and Colleges.

३१. [क] संस्कृताध्ययनाभ्युदयाय भवत्प्रदेशे उपलभ्यमानाः श्रद्धादायनिधयः किंस्वरूपाः किंप्रमाणाः वा? एषां श्रद्धादायानाम् अन्यतमे, यत्कार्योद्देशेन तेषां विसर्गः, तदितरकार्येषु विनियुज्यन्ते ननु? किम् ईदृशं तेषां कार्यान्तरे विनियोगं प्रशस्तं भवन्तः मन्येरन्?

[ख] यदा अधिशासनेन भूस्वामिनाम् अधिकाराः आत्मसात्कृताः, राजसंस्थानानि च विलीनानि, ततःप्रभृति भवत्प्रदेशे विद्यमानेन साम्प्रतिकेन प्रशासनेन समुचितम् आयोजनं कृतं किम्, येन संस्कृतविद्वद्भ्यः संस्कृतपीठेभ्यश्च तैस्तैः राजसंस्थानाधिपैः भूस्वामिभिश्च प्राक् दीयमानं साहाय्यं यथापूर्वं संतन्येत?

३२. [क] केन्द्राधिशासनेन राज्याधिशासनैश्च संस्कृतसंशोधनमन्दिरेभ्यः दीयमानस्य साहाय्यदायस्य निर्धारणार्थं किं नीतिसूत्रं भवन्तः सूचयेयुः?

[ख] श्रद्धेयेभ्यः संस्कृतमहाविद्यालयेभ्यः, पाठशालाभ्यः, 'चतुष्पाठी-टोलेभ्यः' च केन्द्राधिशासनेन, राज्याधिशासनैः, स्थानिकसंस्थाभिः च दीयमानम् आर्थिकसाहाय्यं किंभूमिकं स्यात्?

[ग] संस्कृताशिक्षायाः अर्थदानपूर्वकप्रवर्तने साधारणाः जनाः केन प्रकारेण भागिनः भवेयुः?

[घ] विद्यार्थिनः संस्कृताध्ययनोन्मुखान् विधातुं छात्रवृत्तिः, निःशुल्का-ध्ययनम्, निर्मूल्या भोजनावासव्यवस्था—इत्येवमादीनि कानि साधनानि आश्रयितुम् आवश्यकानि?

[ङ] छात्रवृत्ति-निःशुल्काध्ययनादिकम् आनुकूल्यं भवतां प्रदेशे उपलभ्य-मानं भवन्मतानुसारेण पर्याप्तं ननु?

३३. [क] तासां तासां शास्त्रपरीक्षाणां पाठ्यक्रमेषु प्रमाणमर्यादासु च एकरूपता कथं निर्मातुं सुशका स्यात्?

[ख] तैस्तैः विश्वविद्यालयैः, संस्थाभिः, अधिशासनैः, समितिभिश्च शास्त्रविषयेषु दीयमानानाम् उपाधीनाम् अखिले भारते संज्ञैकरूप्यं स्यात्, इति भवन्तः मन्यन्ते किम्? यदि च एवम्, कानि तद्विषये भवतां संसूचनानि?

31. (*a*) What is the nature and extent of endowments available in your part of the country for promoting Sanskrit Education? Have any of these endowments been diverted for purposes other than those for which they were made? Do you consider such diversion desirable?

(*b*) Following the taking over of *Zamindaris* by Government and the merger of Princely States, have adequate steps been taken by the present-day administration in your part of the country for the continuance of the help which used to be given to Sanskrit scholars and institutions by those States and *Zamindaris*?

32. (*a*) What principles would you recommend for grants-in-aid to be given to Sanskrit Research Institutions by the Central and State Governments?

(*b*) What should be the basis of financial assistance to *bona fide* Sanskrit Colleges, Pāṭhaśālās, Catuṣpāṭhīs, and Ṭols by the Central and State Governments as well as by Local Bodies?

(*c*) In what way can the public participate in financing Sanskrit Education?

(*d*) What measures, such as stipends, free-studentships, free boarding and lodging, etc. are necessary to attract students to the study of Sanskrit?

(*e*) Do you consider the facilities of stipends, free-studentships, etc. now available in your part of the country sufficient?

33. (*a*) In what way is it possible to secure uniformity of courses for and standards of the various Śāstric examinations?

(*b*) Do you think that there should be an all-India uniformity in the nomenclature of degrees and diplomas in Śāstric learning awarded by different Universities, Institutions, States, and Boards? If so, have you any suggestions to make in that behalf?

॥ उ ॥ अनुबन्धः ॥

अथापि प्रश्नावल्या अनया अनभिमृष्टान् कांश्चित् विषयान् अवलम्ब्य, आयोगस्य पुरतः स्वाभिप्रायम् उपन्यस्तुकामाः भवन्तः स्युः, प्रेषयन्तु भवन्तः एतादृशम् अभिप्रायम् अनुबन्धत्वेन, येन अयम् आयोगः अनुगृहीतः भवेत् ॥ इति शम् ॥ * ॥ श्रीः ॥ * ॥

E. Supplementary

If there are any points, not covered by the *Questionnaire*, on which you desire to place your views before the Commission, the Commission will greatly appreciate your expressing such views by way of a Supplement.